क्षीरं स्नेहसमं दद्यात् शतावर्य्या रसं तथा ॥
ताम्रपात्रे दृढ़े चैव शनैर्न्मृद्वग्निना पचेत् ।
अस्यौषधस्य कल्कस्य प्रत्येकं शुक्तिसम्मितम् ॥
जीवन्ती मधुकं द्राक्षाकाकोल्यौ नीलमुत्पलम् ।
मुस्तं सचन्दनं रास्ना पर्णिनीद्वयशारिवे ॥
मेदे द्वे च तथा कुष्ठं जीवकर्षभकौ शटी ।
दार्व्वी प्रियङ्गु त्रिफला नतं तालीशपद्मकौ ॥
एलापत्रं वरीनागजातीकुसुमधान्यकम् ।
मञ्जिष्ठा दाड़िमं दारु रेणुकं शैलवालुकम् ॥
विड़ङ्गं जीरकञ्चैव पेषयित्वा विनिक्षिपेत् ।
वस्त्रपूते च शीते च शर्कराप्रस्थसंयुतम् ॥
निधापयेत् स्निग्धभाण्डे आर्द्रे वा भाजने शुभे ।
अस्यौषधस्य सिद्धस्य शृणु वीर्य्यमतःपरम् ॥
देवदेवं नमस्कृत्य संपूज्य गणनायकम् ।
पिबेत् मात्रिकं तस्य व्याधिं वीक्ष्यानु-
पानतः ॥
सर्व्ववातविकारेषु चापस्मारे विशेषतः ।
उन्मादे पक्षघाते च आध्माने कोष्ठनिग्रहे ॥
कर्णरोगे शिरोरोगे वाधिर्य्ये चापतन्त्रके ।
भूतोन्मादे च मन्यस्थां सोन्नारे चाक्षिपातजे ॥
पार्श्वशूले च हृच्छूले वाह्यायामाहिते तथा ।
वातकण्टकहृद्रोगमूत्रकृच्छ्रे सपङ्गुले ॥
क्रोष्टुशीर्षे तथा खञ्जे कुब्जे चाध्मानि मिन्मिने ।
अपतानेऽन्तरायामे रक्तपित्ते तथोर्द्धगे ॥
आनाहेऽर्शोविकारेषु चातुर्थकज्वरेऽपि च ।
हनुग्रहे तथा शोषे क्षीणे चैवाववाहुके ॥
दण्डापतानके भग्ने दाहे चाक्षेपके तथा ।
जीर्णज्वरे विषे कुष्ठे शेफःस्तम्भे मदात्यये ॥
आढ्यवातेऽग्निमान्द्ये च वातरक्तगदेषु च ।
एकाङ्गरोगिणे चैव तथा सर्व्वाङ्गरोगिणे ॥
हस्तकम्पे शिरःकम्पे जिह्वाकम्पे जड़े भ्रमे ।
क्षीणेन्द्रिये नष्टशुक्रे शुक्रनिःसरणे तथा ॥
स्त्रीणां वातासपाते च पटले चाक्षिसन्दने ।
एकाङ्गस्पन्दने चैव सर्व्वाङ्गस्पन्दने तथा ॥
नगादिपतिते वाले स्त्रीणामप्राप्तिहेतुके ।
आभिचारिकदोषे च धनसन्तापसम्भवे ॥
ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः ।
शिरोमध्यगता ये च जङ्घापार्श्वादिसंस्थिताः ॥
मातृग्रहाभिभूतश्च शिशुर्यश्च विशुष्यति ।
प्रक्षीणबलमांसश्च न वर्त्मगमनक्षमः ॥
घृतेनानेन सिध्यन्ति वज्रमुक्तिरिवासुरान् ।
निहन्ति सकलान् रोगान् घृतं परमदुर्लभम् ॥
रसायनं वह्निबलप्रदञ्च
वपुःप्रकर्षं विदधाति रूपम् ।
दन्तावलेन्द्रेण समानतेजा
दीर्घायुषं पुत्रशतं करोति ॥
स्त्रीणां शतं गच्छति वातिरेकं
न याति हानिं सरसः समाङ्गः ।
अपुत्रिणीपुत्रशतं करोति
शतायुषं कामसमं बलिष्ठम् ॥
महद्घृतं नाम तु छागलाद्यं
विनिर्म्मितं वातनिसूदनञ्च ।
शिवं शुभं रोगभयापहञ्च
चकार हारीतमुनिर्व्विशिष्टः ॥
छगालवर्हिणः पाके पुमांसं तत्र दापयेत् ।
मयूरी जम्बुकी छागी वीर्य्यहीनाः स्वभावतः ॥
भाषितं काशिराजेन छागमेव नपुंसकम् ॥”
घृतम् १६ शेर । क्वाथार्थं छागमांसपलम् १०० । पाकार्थं जलं शं ६४ । शेषः शं १६ । विल्वादिदशमूलं शपलम् १० । जलं शं ६४ । शेषः शं १६ । अश्वगन्धा १०० पलम् । जलं शं ६४ । शेषः शं १६ । वाट्यालकं १०० पलम् । जलं शं ६४ । शेषः शं १६ । दुग्धं शं १६ । शतमूलीरसः शं १६ । कल्कार्थं जीवन्त्यादीनां जीरकपर्य्यन्तानां कल्कद्रव्याणां प्रं तो ४ । वस्त्रपूते शीते शर्करा शं २ । इति बृहच्छागलाद्यं घृतम् । इति भैषज्यरत्नावली ॥
(“छागमांसं तुलार्द्धं स्यात् दशमूलं तथापरम् ।
तोयद्रोणे पचेद्धीमान् यावत् स्यादंशशेषितम् ॥
तैलप्रस्थद्वयञ्चैव क्षीरञ्चैव शतावरी ।
जीवनीयं समधुकं बला रास्ना च शैलजम् ॥
मांसीस्याह्वमतालीशनालुकाचनवालुकम् ।
पृथक् पृथक् समादाय सर्व्वमेकत्र साधयेत् ॥
मञ्जिष्ठालोध्रलाक्षा च प्रत्येकं कुड़वान्वितम् ।
आढ़कञ्च जलञ्चैव विधिना च विपाचयेत् ॥
छागलाद्यमिदं तैलं हारीतेन महात्मना ।
पाने वस्तौ तथाभ्यङ्गे भोज्ये चैव प्रशस्यते ।
सर्व्वज्वरगदं हन्ति सन्धिमज्जास्थिजन्तथा ॥”
इति छागलाद्यं तैलम् ॥
इति वैद्यकरत्नमालिकायां वातरोगाधिकारे ॥)

छागलान्त्रिका, स्त्री, (छागलान्त्री + संज्ञायां कन् । टापि पूर्व्वह्रस्वः ।) वृद्धदारकवृक्षः । इति राजनिर्घण्टः ॥

छागलान्त्री, स्त्री, (छागलं अन्त्रयतीति बाहुलकात् रक् ततो ङीष् ।) वृकः । इति राजनिर्घण्टः ॥

छागवाहनः, पुं, (छागेन आत्मानं वाहयतीति । वह + णिच् + ल्युः । यद्वा, छागो वाहनमस्य ।) अग्निः । इति त्रिकाण्डशेषः ॥

छागिका, स्त्री, (छागी + स्वार्थे कन् । ततः टापि पूर्व्वह्रस्वः ।) छागी । इति हेमचन्द्रः ।४।३४१ ॥

छागी, स्त्री, (छायते छिद्यते देवोपहारायेति । छो + “छापूखड़िभ्यः कित् ।” उणां ।१।१२४। इति गन् छागः ततः स्त्रियां जातौ ङीष् ।) छागमाता । बकरी इति पाँटी इति च भाषा । तत्पर्य्यायः । अजा २ पयस्विनी ३ भीरुः ४ मेध्या ५ गलेस्तनी ६ । इति राजनिर्घण्टः ॥ छागिका ७ मञ्जा ८ सर्व्वभक्ष्या ९ गलस्तनी १० । इति हेमचन्द्रः ॥ तुलुम्पा ११ । इति त्रिकाण्डशेषः ॥ सञ्जा १२ सुखविलुण्ठिका १३ । इति शब्दरत्नावली ॥ तद्दुग्धगुणाः । मधुरत्वम् । शीतलत्वम् । ग्राहित्वम् । दीपनत्वम् । रक्तपित्तविकारक्षयकासनाशित्वञ्च । यथा, राजनिर्घण्टे ।
“अजानां लघुकायत्वान्नानाद्रव्यनिषेवणात् ।
नात्यम्बुपानात् व्यायामात् सर्व्वव्याधिहरं पयः ॥”
कषायत्वम् । लघुत्वम् । अतीसारज्वरनाशित्वञ्च । यथा, भावप्रकाशे ।
“छागं कषायं मधुरं शीतं ग्राहि पयो लघु ।
रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम् ॥
अजानामल्पकायत्वात् कटुतिक्तादिभक्षणात् ।
स्तोकाम्बुपानाद्व्यायामात् सर्व्वरोगापहं पयः ॥”
तद्दधिगुणाः । उत्तमत्वम् । ग्राहित्वम् । लघुत्वम् । दोषत्रयापहत्वम् । श्वासकासार्शःक्षयकार्श्येषु शस्तत्वम् । दीपनत्वञ्च । इति भावप्रकाशः ॥ कफवातनेत्रदोषदुर्नामश्वासकासनाशित्वम् । उष्णत्वम् । रुच्यत्वम् । पाचनत्वञ्च ॥ तन्नवनीतगुणाः । लघुत्वम् । मधुरत्वम् । कषायत्वम् । त्रिदोषनाशित्वम् । चक्षुष्यत्वम् । दीपनत्वम् । बल्यत्वम् । सदा हितत्वञ्च ॥ तन्नवोत्थनवनीतगुणाः । क्षयकासनेत्रामयकफनाशित्वम् । बल्यत्वम् । परमदीपनत्वञ्च ॥ तद्घृतगुणाः । चक्षुष्यत्वम् । दीपनत्वम् । बलवर्द्धनत्वम् । कासश्वासकफनाशित्वम् । राजयक्ष्मणि शस्तत्वञ्च । इति राजनिर्घण्टः ॥

छातः, त्रि, (छो + क्तः । “शाच्छोरन्यतरस्याम् ।” ७ । ४ । ४१ । इति विभाषायामित्वाभावः ।) छिन्नः । दुर्ब्बलः । इत्यमरः । ३ । १ । १०३ ॥

छात्रं, क्ली, वरटीच्छत्रसम्भवं मधु । तस्य गुणाः । श्वित्रक्रिमिरोगरक्तपित्तनाशित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥
(“वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्व्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ॥”
छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ।
स्वादुपाकं क्रिमिश्वित्ररक्तपित्तप्रमेहजित् ।
भ्रमतृड्मोहविषहृत् तर्पणञ्च गुणाधिकम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

छा(त्त्र)त्रः, पुं, (छत्रं गुरोर्दोषाणामावरणं तच्छीलमस्येति । “छत्रादिभ्यो णः ।” ४ । ४ । ६२ । इति णः ।) शिष्यः । इत्यमरः । २ । ७ । ११ ॥ (यथा, राजतरङ्गिण्याम् । ६ । ८७ ।
“भूभुजा दानशौण्डेन पैत्रिके स्थण्डिले ततः ।
छात्राणामार्य्यदेशानां तेन विद्यार्थिनां मठः ॥”)

छात्रकं, क्ली, (छात्र + स्वार्थे कन् ।) छात्रं मधु । यथा, राजनिर्घण्टे ।
“छत्राकारन्तु पटलं सरघाः पीतपिङ्गलाः ।
ये कुर्व्वन्ति तदुत्पन्नं मधु च्छात्रकमीरितम् ।
श्वित्रमेहक्रिमिघ्नञ्च विद्याच्छात्रं गुणोत्तरम् ॥”
अपिच भावप्रकाशे ।
“वरटाः कपिलाः पीताः प्रायो हिमवतो वने ।
कुर्व्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ॥
छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ।
स्वादुपाकं क्रिमिश्वित्ररक्तपित्तप्रमेहजित् ॥
भ्रमतृड्मोहविषहृत्तर्पणञ्च गुणाधिकम् ॥”

छात्रगण्डः, पुं, (छात्रो गण्ड इव ।) पदार्थवित् । विभक्तमन्तस्य श्लोकचरणस्य वा आदिमात्रवेत्ता ।